# mInAkShI pa ncharatnam

# મીનાક્ષી પઞ્ચરત્નમ્

## Document Information

Text title : mInAkShI paJNcharatnam

File name : miinaakshii5.itx

Category : pancharatna, devii, mInAkShI, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Ravisankar S. Mayavaram

Proofread by : Ravisankar S. Mayavaram

Latest update : March 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# મીનાક્ષી પઞ્ચરત્નમ્

॥ શ્રીઃ ॥

॥ અથ મીનાક્ષી પઞ્ચરત્નમ્ ॥

ઉદ્યદ્ભાનુ સહસ્રકોટિસદૃશાં કેયૂરહારોજ્જ્વલાં
બિમ્બોષ્ઠીં સ્મિતદન્તપંક્તિરુચિરાં પીતામ્બરાલંકૃતામ્ ।
વિષ્ણુબ્રહ્મસુરેન્દ્રસેવિતપદાં તત્ત્વસ્વરૂપાં શિવાં
મીનાક્ષીં પ્રણતોઽસ્મિ સંતતમહં કારુણ્યવારાંનિધિમ્ ॥ ૧॥

મુક્તાહારલસત્કિરીટરુચિરાં પૂર્ણેન્દુવક્ત્ર પ્રભાં
શિઞ્જન્નૂપુરકિંકિણિમણિધરાં પદ્મપ્રભાભાસુરામ્ ।
સર્વાભીષ્ટફલપ્રદાં ગિરિસુતાં વાણીરમાસેવિતાં
મીનાક્ષીં પ્રણતોઽસ્મિ સંતતમહં કારુણ્યવારાંનિધિમ્ ॥ ૨॥

શ્રીવિદ્યાં શિવવામભાગનિલયાં હ્રીંકારમન્ત્રોજ્જ્વલાં
શ્રીચક્રાઙ્કિત બિન્દુમધ્યવસતિં શ્રીમત્સભાનાયકીમ્ ।
શ્રીમત્ષણ્મુખવિઘ્નરાજજનનીં શ્રીમજ્જગન્મોહિનીં
મીનાક્ષીં પ્રણતોઽસ્મિ સંતતમહં કારુણ્યવારાંનિધિમ્ ॥ ૩॥

શ્રીમત્સુન્દરનાયકીં ભયહરાં જ્ઞાનપ્રદાં નિર્મલાં
શ્યામાભાં કમલાસનાર્ચિતપદાં નારાયણસ્યાનુજામ્ ।
વીણાવેણુમૃદઙ્ગવાદ્યરસિકાં નાનાવિધામમ્બિકાં var નાનાવિધાઽમ્બિકાં
મીનાક્ષીં પ્રણતોઽસ્મિ સંતતમહં કારુણ્યવારાંનિધિમ્ ॥ ૪॥

નાનાયોગિમુનીન્દ્રહૃન્નિવસતીં નાનાર્થસિદ્ધિપ્રદાં
નાનાપુષ્પવિરાજિતાંઘ્રિયુગલાં નારાયણેનાર્ચિતામ્ ।
નાદબ્રહ્મમયીં પરાત્પરતરાં નાનાર્થતત્વાત્મિકાં
મીનાક્ષીં પ્રણતોઽસ્મિ સંતતમહં કારુણ્યવારાંનિધિમ્ ॥ ૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય

શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
મીનાક્ષી પઞ્ચરત્નં સમ્પૂર્ણમ્ ।

Regarding variation
nAnAvidha = by various manners or ways
+ADambikAM
ADambara = a drum used in battle
a charge sounded by musical instruments; the din or uproar
of battle (Mb 7:72:11))

Encoded and proofread by Ravisankar S. Mayavaram

*mInAkShI pa ncharatnam*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*